दन्तीवृक्षः। इति राजनिर्घण्टः॥

(अस्याः पर्य्याया यथा,—

"लघुदन्ती विशल्या च स्यादुदुम्बरपर्ण्यपि।
तथैरण्डफला शीघ्रा श्येनघण्टा घुणप्रिया।
वाराहाङ्गी च कथिता निकुम्भश्च मकूलकः"॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

एरण्डा, स्त्री, (आ+ईर्+बाहुलकात् अण्डच्+टाप्।) पिप्पली। इति शब्दचन्द्रिका॥

एर्व्वारुः, पुं, (एरणमिति। आ+ईर्+सम्पदादित्वात् क्विप्। एरं वृणोति वारयति वा। वृञ्+बाहुलकात् उण्।) कर्कटीभेदः। तत्पर्य्यायः। व्यालपत्त्रा २ लोमशा ३ स्थूला ४ तोयफला ५ हस्तिदन्तफला ६ कर्कटी ७। अस्य गुणाः। पित्तहरत्वम्। सुशीतलत्वम्। मधुरत्वम्। मूत्रामयघ्नत्वम्। रुचिप्रदत्वम्। सन्तापमूर्च्छापहरत्वम् दाहदाहत्वम्। अतिसेवितश्चेत् वातप्रकोपकारित्वञ्च। इति राजनिर्घण्टः॥

("एर्व्वारुकं स्वादु शीतं सक्षारं कफवातहृत्।
नातिपित्तकरं रुच्यं दीपनं दाहनाशनम्"॥

इति प्रथमस्थाने दशमेऽध्याये हारीतेनोक्तम्॥

"त्रपुषैर्व्वारुकं स्वादु गुरु विष्टम्भि शीतलम्।
एर्व्वारुकञ्च सम्पक्वं दाहतृष्णाक्लमार्त्तिनुत्"॥

इति सूत्रस्थाने सप्तविंशेऽध्याये चरकेणोक्तम्॥)

एलकः, त्रि, (एलति विग्रहादिस्थले आत्मानं क्षिपतीति इल्+ण्वुल्।) मेषः। इति राजनिर्घण्टः॥

एलङ्गः, पुं, (एरङ्गः+रस्य लः।) मत्स्यभेदः। रायकड़ा इति भाषा। रायखाँड़ा एलाङ्गा इत्यपि ख्यातः। अस्य गुणाः। मधुरत्वम्। वृष्यत्वम्। संग्राहित्वम्। कफवातनाशित्वम्। मेधाग्निपुष्टिकारित्वम्। शीतलत्वम्। गुरुत्वम्। श्लेष्मप्रसादनत्वञ्च। इति राजनिर्घण्टः॥ (यथा वैद्यकचक्रपाणिसंग्रहद्रव्यगुणे मांसवर्गाधिकारे॥

"एलङ्गः स्निग्धो मधुरो गुरुविष्टम्भिशीतलः"॥)

एलबालु, क्ली, (एलतीति। इल प्रेरणे पचाद्यच्। टाप्। एलेव बलते। बल प्राणने। बाहुलकात् उण्। ङ्यापोरिति ह्रस्वः।) एलबालुकम्। इति शब्दरत्नावली॥ (यत्र व्यवह्रियते तद्यथा, रोध्रादिगणे॥

"सैलबालु परिपेलवमोचाः"॥

इति वाभटे सूत्रस्थाने पञ्चदशेऽध्याये॥)

एलबालुकं, क्ली, (एलबालु+स्वार्थे कन्।) सुगन्धिद्रव्यविशेषः। वालुका इति ख्यातम्। तत्पर्य्यायः। ऐलेयम् २ सुगन्धि ३ हरिबालुकम् ४ बालुकम् ५ इत्यमरः॥ हरिवासुकम् ६। इति तट्टीका॥ आलुकम् ७ एल्वबालुकं ८ कपित्थत्वक् ९ गन्धत्वक् १० कुष्ठगन्धि ११। अस्य गुणाः। अत्युग्रत्वम्। कषायत्वम्। कफवातमूर्च्छातिज्वरदाहनाशित्वम्। परमरुचिकारित्वञ्च। इति राजनिर्घण्टः॥ कक्कोलसदृशं कुष्ठगन्धि॥ अस्य पर्य्यायगुणाः॥

"एलबालुकमैलेयं सुगन्धि हरिबालुकम्।
ऐलबालुकमेलालु कपित्थं पत्रमीरितम्॥
एल्वालु कटुकं पाके कषायं शीतलं लघु।
हन्ति कण्डूव्रणच्छर्द्दितृट्कासारुचिहृद्रुजः॥
बलासविषपित्तास्रकुष्ठमूत्रगदक्रिमीन्"।

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

एलविलः, पुं, ऐलविलः। कुवेरः। इत्यमरटीका॥

एला, स्त्री, (इल्+अच्+टाप्।) फलवृक्षविशेषः। एलाचि इति भाषा। तत्पर्य्यायः। बहुलगन्धा २ ऐन्द्री ३ द्राविड़ी ४ कपोतपर्णी ५ बाला ६ बलवती ७ हिमा ८ चन्द्रिका ९ सागरगामिनी १० गन्धालीगर्भः ११ एलीका १२ कायस्था १३। इति राजनिर्घण्टः॥ सा द्विविधा सूक्ष्मा। गुजराटी एलाचि इति भाषा। स्थूला च। वड़ एलाचि इति भाषा। आद्यायाः पर्य्यायः। उपकुञ्चिका १ तुत्था २ कोरङ्गी ३ त्रिपुटा ४ त्रुटिः ५। इत्यमरः॥ वयस्था ६ तीक्ष्णगन्धा ७ सूक्ष्मैला ८ त्रिपुटी ९। इति रत्नमाला॥ द्वितीयायाः पर्य्यायः। पृथ्वीका २ चन्द्रबाला ३ निष्कुटिः ४ बहुला ५। इत्यमरः॥ स्थूला ६ मालेया ७ ताड़काफलम् ८। इति रत्नमाला॥ एलाद्वयगुणाः। शीतलत्वम्। तिक्तत्वम्। उष्णत्वम्। सुगन्धित्वम्। पित्तरोगकफनाशित्वम्। हृद्रोगकारित्वम्। मलार्त्तिवान्तिपुंस्त्वघ्नत्वम्। स्थविरस्य गुणाढ्यत्वञ्च। इति राजनिर्घण्टः॥ अपिच। सूक्ष्मकोष्ठवद्धतृष्णाच्छर्द्दिवायुनाशित्वम्। इति राजवल्लभः॥ सूक्ष्मैलाविशेषगुणाः। कफश्वासकासार्शोमूत्रकृच्छ्रनाशित्वम्। इति राजनिर्घण्टः॥

("एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च"।

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

एलापत्त्रः, पुं, (एलापत्त्रमिवाकारोऽस्त्यस्य। अर्श आदेरच्।) नागभेदः। इति जटाधरः॥ (यथा महाभारते आस्तीके पर्व्वणि १। ३५। ६।

"नागस्तथा पिञ्जरक एलापत्त्रोऽथ वामनः"॥)

एलापर्णी, स्त्री, (एलाया इव पर्णमस्याः। "पाककर्णेति"। ४। १। ६४। ङीष्।) वृक्षविशेषः। काँटा आमरुली एलानी इति च भाषा। तत्पर्य्यायः। सुवहा २ रास्ना ३ युक्तरसा ४। इत्यमरः॥

एलीका, स्त्री, (आ+इल्+ईकन्+टाप्।) सूक्ष्मैला। इति राजनिर्घण्टः॥ (द्राविड़ीशब्देऽस्या गुणादयो ज्ञातव्याः॥)

एव, व्य, (अयनमिति। इण्+"इणशीभ्यां वन्"। १। ५२। उणादिः वन्।) अवधारणम्। यथा। त्वमेव जानासि। तत्पर्य्यायः। एवम् २ तु ३ पुनः ४ वा ५। इत्यमरः॥ व ६ च ७। इति सुभूतिः॥ सादृश्यम्। इति भरतः। नियोगः। वाक्यपूरणम्। चारनियोगः। विनिग्रहः। इति मेदिनी॥ (अनियोगः। यथा "अद्यैव" इति मुग्धबोधव्याकरणम्। एवकारस्त्रिविधः। विशेष्यसङ्गतः विशेषणसङ्गतः क्रियासङ्गतश्चेति। तत्र विशेष्यसङ्गतस्य एवकारस्य अन्ययोगव्यवच्छेदोऽर्थः। पार्थ एव धनुर्द्धर इत्यादौ विशेषणे धनुर्द्धरे पार्थान्ययोगव्यवच्छेदाबोधात्। धनुर्द्धरपदस्य उत्कृष्टधनुर्द्धरे लाक्षणिकत्वात् तथैव तात्पर्य्यात्। पार्थान्ययोगस्तादात्म्यम्। विशेषणसङ्गतस्य एवकारस्य अयोगव्यवच्छेदोऽर्थः। शङ्खः पाण्डुर एव इत्यादौ विशेष्ये शङ्खे पाण्डुरत्वायोगव्यवच्छेदबोधात्। क्रियासङ्गतस्य एवकारस्य चात्यन्तायोगव्यवच्छेदोऽर्थः। सम्भवाभिप्रायके नीलं सरोजं भवत्येव इत्यादौ अन्वयितावच्छेदकसरोजत्वसामानाधिकरण्येन सरोजनीलभवनकर्त्तृत्वात्यन्तायोगव्यवच्छेदबोधादिति सम्प्रदायः।) गमनकर्त्तरि त्रि। इति सिद्धान्तकौमुदी (यथा ऋग्वेदे ६। ५१। २। "ऋजुमर्तेषु वृजिना च पश्यन्नभिचष्टे सूरो अर्य एवान्"॥ अश्वे पुं, यथा, ऋग्वेदे। १। १५८। ३। "उप वामवः शरणम् गमेयं शूरो नाज्म पतयद्भिरेवैः"॥ "एवैरश्वैः" इति भाष्यम्। गमने क्ली। यथा, ऋग्वेदे १। १२९। ३। "एवेन सद्यः पर्य्येति पार्थिवम्"। "एवेन गमनेन"। इति। भाष्यम्॥)

एवं, व्य, साम्यम्। सादृश्यम्। यथा। अग्निरेवं विप्रः। अग्निरिवेत्यर्थः। तत्पर्य्यायः। वत् २ वा ३ यथा ४ तथा ५ इव ६। वत्स्थाने व इति केचित् पठन्ति। अयं प्रकारः। (यथा, कुमारे। ६। ८४।

"एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी"॥)

तत्पर्य्यायः। इत्थम् २। अवधारणम्। इत्यमरः॥ यथा। एवमेतत्। अस्य पर्य्यायः एवशब्दे लिखितः। अङ्गीकारः। अर्थप्रश्नः। परहतिः। पृच्छा। इति मेदिनी॥

एष ऋ ङ गतौ। इति कविकल्पद्रुमः॥ भ्वादिं-आत्मं-सकं-सेट्।) ऋ मा भवान् एषिषत्। ङ एषते। इति दुर्गादासः।

(यथा, भागवते ३। १४। ४५।

"स वै वत भ्रष्टमतिस्तवैषते
यः कर्म्मणां पारमपारकर्म्मणाम्"॥)

एषः, पुं, पुरोवर्त्तिपुरुषः। एतद्शब्दस्य पुंलिङ्गे प्रथमैकवचने रूपमिदम्॥

एषणः, पुं, (इष्+ल्यु।) लौहमयबाणः। इति हलायुधः॥ (यथा, भागवते ७। ९। ३९।

"कामातुरं हर्षशोकभयैषणार्त्तं
तस्मिन् कथं तव गतिं विमृशामि दीनः"॥)

एषणिका, स्त्री, (इष्यतेऽनया। इष् गतौ+ल्युट्+स्वार्थे कन् ततो टाप् इत्वञ्च।) स्वर्णकारादीनां तुला। निक्ति इति भाषा। तत्पर्य्यायः। नाराची २। इत्यमरः॥

एषणी, स्त्री, (इष्यते अनया, इष्+ल्युट्+ङीष्।) व्रणमार्गानुसारिणी। वेलकार इति भाषा। तुलाभेदः। इति मेदिनी॥ निक्ति इति भाषा॥

एषा, स्त्री, (इषु श वाञ्छे+टाप्।) इच्छा। इति जटाधरः॥ एतद्शब्दस्य स्त्रीलिङ्गेऽपि रूपमिदम्॥

ऐ

ऐ ऐकारः। स तु द्वादशस्वरवर्णः। अस्योच्चारणस्थानं तालु कण्ठश्च। ("एदैतोः कण्ठतालु" इ-